# भूमिः

1-भूमिः कन्दुकवत् गोलाकृतिः।

2- तस्यास्त्रिषु भागेषु द्वौ भागौ जलम्।

3- त्रिष्वेको भागः स्थलम्।

4- चित्रं पश्य, तत्र शुक्लो भागः स्थलम्।

5- कृष्णो भागः जलम्।

6- स्थलभागः - एष्या, यूरोप् , आफ्रिका, अमेरिका, आस्त्रेलिया चेति पञ्चखण्डत्वेन विभक्तः।

7- जलभागः - शान्तसागरः, अतलान्तिकसागरः, भारतसागरः, उत्तरध्रुवसागरः, दक्षिणध्रुवसागरश्चेति पञ्चसागरत्वेन विभक्तः।

8- समुद्रेषु तत्र तत्र सिंहलादयो द्वीपाः सन्ति।

9- एष्याखण्डः सर्वेषु खण्डेषु विशालतमः।

10- खण्डेऽस्मिन् विद्यया परिष्कारेण च खण्डान्तराण्यतिशयानाऽस्माकं

भारतभूमिर्विराजते ।

Sanskrit cümlelerin gramatik analizini yaparak Türkçeye çevirmek.